आत्मवल्लभ ग्रन्थसिरीज़ नं. ५

न्यायाम्भोनिधि श्रीमद्विजयानन्दसूरीश्वरपट्टधरश्रीमद्विजयवल्लभसूरीश्वरपादपद्मेभ्यो नमः ।

श्रीमज्जयशेखरसूरि–विरचिता—

# द्वात्रिंशिकात्रयी.

संशोधकः–पंन्यास–श्रीउमङ्गविजयो गणी

पूज्यपादजैनाचार्य्यश्रीमद्विजयवल्लभसूरीश्वर–मुख्यशिष्यरत्नतपोनिधिश्रीमद्विवेकविजयशिष्यपंन्यास–श्रीउमङ्गविजय-गण्युपदिष्टमरुस्थलदेशान्तर्गत 'खुडाला' ग्रामवास्तव्यश्रेष्ठिवर्य्य शा. "भीखमचन्द खीमजी" प्रदत्तद्रव्यसाहाय्येन

प्रकाशक–'बाबू गोपीचंद्र वकील' सभापति श्रीआत्मानन्दजैनसभा अंबाला सीटी. ( पंजाब )

[ नकल ५०० ] वीरसम्वत् २४५१ आत्मसम्वत् २९ विक्रमसंवत् १९८२ सन १९२५ [ मूल्यममूल्यम् ]

PRINTED BY–Ramchandra Yesu Shedge, at the "Nirnaya Sagar" Press, 26-28, Kolbhat Lane, Bombay.
PUBLISHED BY–Babu Gopichand Vakil, Secretary, Shri Atmanand Jain Sabha, Ambala, Punjab.

॥ अर्हम् ॥

॥ न्यायाम्भोनिधिश्रीमद्विजयानन्दसूरीश्वरपट्टधरश्रीमद्विजयवल्लभसूरीश्वरपादपद्मेभ्यो नमः ॥

श्रीमज्जयशेखरसूरिविरचिता—

# तीर्थाधिराज श्रीशत्रुञ्जयतीर्थस्तुतिगर्भिता—द्वात्रिंशिका.

श्रीपुण्डरीकाचलमौलिमौलि—मुन्मीलिताऽनादिसमाधिलीनम् । शक्त्याऽल्पया पुष्कलया च भक्त्या, स्तुवे शिवेच्छः प्रथमं जिनेशम् ॥ १ ॥ क्व ते स्तुतिः ? कुण्ठितशक्रशक्तिः, क्व चाऽहमज्ञेषु धुरीणरेखः ? । स्तुतेर्मि[1]षादेष जनः सुमेरु—मारोढुमुद्यच्छति पङ्गुकल्पः ॥ २ ॥ परं भवद्भक्तिभरेरितः स—न्नवं नवं कर्तुमहं यतिष्ये । अत्येति नेतः ! कियतीमपि क्ष्मां, यतः परप्रेरणयोपलोऽपि ॥ ३ ॥ विलीनमीनध्वजराजमान !, सत्केवलज्ञानविराजमान ! । जय त्वमादीश ! जिनाभि[2]जात !, नि[3]ष्णातजातस्तुत ! नाभिजात ! ॥ ४ ॥ सुधाञ्जनं सज्जनलोचनेषु, मिथ्यादृशामक्षिषु धूमरेखा । यैरालुलोके विमलाचलोऽयं, पुण्यानि तान्येव चिरं जयन्तु ॥ ५ ॥ सुप[4]र्वशैलादपि पर्वतोऽयं, स्वामिन्महीयानिति मे वितर्कः । नो चेदवापुः किमु मंक्षु मोक्षं, मुमुक्षवोऽमुष्य शिरोधिरुह्य ? ॥ ६ ॥ ये ये विनिर्माय मनो विमाय—मायान्ति ते तेऽत्र भवन्ति स[5]न्तः । पुण्यश्रियः पात्रमतो मतोऽयं, त्वत्सा[6]नुमानक्षयपुण्यकोशः ॥ ७ ॥ स्पृष्टोऽपि लोकैः शिरसि स्वपादै—र्दत्ते सुखं तात्त्विकमेव

---

१ स्तवं—२ जिनश्रेष्ठ ! । ३ पंडितसमूहेन स्तुत ! ४ मेरुपर्वतात्—५ सन्तः पूजिताः । ६ सानुमान् सिद्धाचलाख्यपर्वतः ।

तेभ्यः । संसर्गतस्ते शमिनो मुनीश !, क्ष्माधरोऽभूच्चरितार्थ एषः ॥ ८ ॥ भुवं प्रविष्टो नरकं पिधत्ते, पुनाति पृथ्वीं विशदैः खपादैः । गिरिस्त्वयाऽयं गगनाग्रलग्नोऽपवर्गमार्गं सुगमं करोति ॥ ९ ॥ अमुं महद्भ्योऽपि महान्तमद्रिं, श्रयन्ति माहात्म्यधना जना ये । भवाब्धिमस्ताघमदृश्यपारं, तरन्ति ते मंक्षु तदीश ! चित्रम् ॥१०॥ सन्त्यत्र शैला बहवोऽयमेव, गिरिः परं सिद्धपदं प्रसिद्धः । के के ग्रहा व्योमनि न स्फुरन्ति, सुधानिधानं विधुरेव किन्तु ॥ ११ ॥ आरोहतां स्यादचलेऽत्र दूरं, नीचैर्गतिः स्वर्गशिवौ त्वदूरे । प्रत्यक्षमेतज्जगतोऽप्यतोऽन्यत्, प्रमाणमन्तर्गतभाव एव ॥ १२ ॥ श्रितस्त्रिलोकीपतिना त्वयाऽयं, शैलश्चलन्निर्झरबद्धकक्षः । सन्नाह्यदन्तीव बलिष्ठदन्तो, दृष्टोऽपि भावारिबलं भिनत्ति ॥ १३ ॥ विराजसेऽस्मिन्नचले निलीन-स्त्वं सिद्धयोगीव युगादिदेव ! । सिद्धं रसं शान्तमवाप्य यस्मा-ज्जायेत कल्याणधनो जनौघः ॥ १४ ॥ शिलोच्चयः शैलकुलेऽखिलेऽपि, युक्तं जिनासौ वहते विभुत्वम् । नष्टापदऽष्टापदकान्तकान्ति-र्यदीयमौलौ मुकुटायसे त्वम् ॥ १५ ॥ चलाचला भूरिमलाऽऽविलां च, रजोमयी दृष्टविचित्रमारा । क्व सुन्दरी ? क्वाऽस्य दरी नगस्य, ? स्थिरा पवित्रा विरजा अहिंस्रा ॥ १६ ॥ मेघेन मुक्तं तव शैलमौला-वधोयियासज्जलमश्रुवारि । अधित्यकायामिह नित्यरङ्गैः,

---

१ क्ष्मां पृथिवीं धरतीति क्ष्माधरः । २ स्वपादैर्निजलघुपर्वतैः । ३ युद्धहस्तीव ४ स्वर्णवत्सुन्दरकान्तिमान् ५ चञ्चला । ६ बहुविण्मूत्रादिमलेन मलीना । ७ रजस्वला ८ दृष्टो विचित्रमारः पत्यादिमारणं यस्यां सा । एतेन श्लोकपूर्वार्धान्तर्गतविशेषणचतुष्टयेन सुन्दर्यां स्त्रियां दोषाः प्रकटिताः । श्लोकोत्तरार्धगतेतरविशेषणचतुष्टयेन अस्य पर्वतस्य दर्यां गुहायां दोषाभावो दर्शितः । ९ गिरेरुपरिभूमिकायां

शृङ्गैस्तु लेभे किमु कूटनाम ? ॥ १७ ॥ न यान्ति ये गोत्र[1]ममुं विहाय, विहा[2]यसस्सन्तु चिरायुषस्ते । किं तैर्न-
रैरप्यऽफलावतारै-र्नालोकि यैस्तीर्थमदोऽपदोषम् ॥ १८ ॥ कर्पूरपारीभिरुताऽमृतांशो, रुग्भिः सुधावारिधि-
वीचिभिर्वा । पुण्याणुभिर्वा घटितेति चेतः, सन्देग्धि शुभ्रां तव वीक्ष्य मूर्तिम् ॥ १९ ॥ केचित्तवोपास्तिविधौ
प्रमोदं, परे प्रमादं च दधत्यऽधन्याः । द्वयेऽपि ते [3]कौशिकतां लभन्ते, स्वर्गे विनैनं गिरिमद्रिदुर्गे ॥ २० ॥ त्वं
देव ! तावद्वृषभाभिधानः, पङ्के निमग्नश्च जनो जिनाऽयम् । मामात्तमुद्धर्तुमतो यतस्व, स्वनामवा[4]मो हि किमु-
त्तमः स्यात् ? ॥२१॥ चिरादसञ्चारतरः शिवाऽध्वा, त्वया तथाऽवाहि महोर्जितेन । प्रायः स्खलन्ति स्म न बाल-
वृद्धा, एकाकिनोऽप्यऽत्र यथा चरन्तः ॥ २२ ॥ भावारिभीत्या श्रितमुक्तिदुर्गे, वीरः कुले ते स मरीचिरेकः ।
कृत्वा पुरो यो भवभीतलोक-[5]मादुःखमारं स्वयमार मोक्षम् ॥ २३ ॥ मोक्षं त्रिलोकीलतिकाशिरःस्थं, फलं सुधा-
स्वादु जिघृक्षुरेनम् । निःश्रेणिकावद्गिरिमारुरोह, मोहादिगृध्रो धुनुते पुनर्मां ॥ २४ ॥ संसा[6]रचुण्डीचिरवासलग्न-
पङ्कप्रलीनोर्ध्वगतिप्रयत्नः । कृपासरस्तावकपादपद्मे, चिखेलिषत्येष मदीयहंसः ॥ २५ ॥ पद्मासनासीनमदीन-
तोषं, कृपारसागारमरागरोषम् । भवन्तमालोक्य कदा मुदाऽह-मदाहदुःखं स्वमनः करिष्ये ? ॥ २६ ॥ कदा

---

१ शत्रुञ्जयपर्वतं २ पक्षिणः ३–धन्याः कौशिकतामिन्द्रतां स्वर्गे लभन्ते, अधन्यास्तु कौशिकतां घूकत्वमेतदन्याद्रिदुर्गे लभन्ते इत्यर्थः सूचितः ४ वामोऽधमः ५ आदुःखमारं यावत्पञ्चमारं ६ संसार एव चुण्डी कूपपार्श्ववर्त्तिजलाशयस्तत्र चिरकालवासतो लग्नं यत्पङ्कं पापं तत्प्रलीनाद्विनाशादूर्ध्वगतौ मोक्षगतौ प्रयत्नं यस्य सः ।

कदाशा[1]मृगतृष्णिकाया-मसद्[2]रसप्रार्थनया विषण्णः । त्वद्ध्यानमुद्यानमिवाधिगत्य, नित्यं लयं चित्तमृगो गमी
मे ? ॥ २७ ॥ कदा त्वदालोकनजप्रमोद-मेघस्विचक्षुःक्षरदश्रुनीरैः । निःशेषनिर्वापितदुःखदावः, सद्भाववल्लीं
परिवर्धयेऽहम् ? ॥ २८ ॥ असारसंसारविहाररीणौ, स्पृष्ट्वा कृतार्थौ तव तीर्थमार्गम् । कदा क्रमावीश ! ममेत-
रासां, भवभ्रमीणां प्रकरिष्यतोऽन्तम् ॥ २९ ॥ बालोऽहमाऽऽलोक्य चिराद्भवन्तं, तातं निरातङ्कमतिः प्रसन्नम् ।
प्रियं प्रियं वस्तु कदार्थयिष्ये, बलादपि प्रीतिविकस्वरास्यः ॥ ३० ॥ चित्ते पुरा याश्चन वीचयो मे-ऽभूवन्ननेकास्त्वयि वीक्षिते ताः । नाकस्मिकाद्विस्मयतः स्मरन्ति, स्वेनैव तद्योग्यतया प्रसीद ॥ ३१ ॥

एवं सर्वसुपर्वसंहतियुतश्रीमन्महेन्द्रार्चित !, श्रीशत्रुञ्जयशेखर ! प्रियकर ! श्रीमद्युगादीश्वर ! ।
वाचो मार्गमुपेतया स्तुतिमिषाच्चेतःस्थभक्त्याऽनया, चेत्तुष्टोसि तदा सदा निजपदाभ्यर्णे स्थितिं देहि मे ३२

॥ इति श्रीजयशेखरसूरिविरचिता श्रीशत्रुञ्जयतीर्थस्तुतिगर्भिता प्रथमा द्वात्रिंशिका ॥

## ॥ अथ श्रीगिरनारतीर्थस्तुतिगर्भिताद्वात्रिंशिका ॥



शृङ्गारयन्तं गिरिमुज्ञयन्तं, पञ्चेषुचक्रम् धुतमुज्ञयन्तम् । श्रीनेमिनं नौमि निरस्तमोहं, व्यपोहितुं भक्तिपरस्तमोऽहम् ॥ १ ॥ स्तुतं श्रुतज्ञैः समतोदधे ! त्वां, स्तुवन्नविद्वानपि नाऽस्मि निन्द्यः । निम्बः स्फुटन्मासि मधौ[3]

१ कुत्सिताऽऽशा कदाशा सैव मृगाणां तृष्णिकेव तृष्णिका तस्यां । २ अविद्यमानजलप्रार्थनया । ३ चैत्रे ।

विकासि-रसालसंशालिनि किं विगेयः ? ॥ २॥ ममाद्य माद्यत्तमसां विनाशे, ज्ञाते च मोक्षाध्वनि सुप्रकाशे श्रीउज्जयन्तोदयशैलशृङ्गे, त्वद्दर्शनेनाऽजनि सुप्रभातम् ॥ ३ ॥ नृपः समुद्रो विजयात् पयोधे-र्जातो जगन्नाथ ! यथार्थनामा। लोकद्वयास्तोकसुखोपनेता, चिन्तामणिः प्रादुरभूर्यतस्त्वम् ॥ ४ ॥ आहत्य सिंहासनमुग्रनाद-दुर्वादिदन्तीन्द्रनिराकरिष्णुम् । याऽजीजनत्त्वां महिला बलाढ्यं, चित्रं ! शिवेति श्रुतिमाप सापि ॥ ५ ॥ ब्रह्मास्त्रनिर्नाशितभावशत्रोः, पुष्पायुधेनापि विडम्ब्यमानः। कृष्णः सतृष्णस्तव निर्जयाय, मृगो मृगारेरिव किं रराज ? ॥ ६ ॥ स्वयं प्रपद्यापि विवाहकर्म, धर्म्मज्ञ! यत्तत्र पराङ्मुखोऽभूः। तत्रैकहेतुः शिवलाभलोभो, लोभान्न वा कस्त्यजति प्रतिज्ञाम् ॥ ७ ॥ अदास्तदा निर्वृतिकारि कारा-निबद्धतिर्यक्षु यथा स्वचक्षुः। किं सारशक्ते ! परमोपरक्ते, भक्ते जनेऽस्मिन्न तथा ददासि ? ॥ ८ ॥ चेत्त्वं मुमुक्षुः किमुरीकृताह-मुरीकृता वा किमु नाथ ! मुक्ता ? । स्वयं नयज्ञोऽसि किमुच्यते ते ?, जीयाद्वचो भोजभुवस्त्वयीति ॥ ९ ॥ राजीमती मन्थरताबलत्वलक्ष्म स्त्रियां मार्ष्टुमिहोदियाय । किमन्यथा त्वत्प्रथमं जगाम, सा कामवीराभिभवाद्भवान्तम् ॥ १० ॥ घनाघनाभे त्वयि पर्वतेऽत्र, वर्षत्यजस्रं वचनामृतेन । भव्या अभव्याः क्रमशो मयूर-मरालकेलीः कलयाम्बभूवुः ॥ ११ ॥ पपात पूरे पतितं यदीये, त्रिलोकमन्तर्भववार्द्धि तस्यां । कृष्णानुजः कृष्णतनुश्च कृष्ण-चित्रोऽभवस्त्वं

---

१ निन्द्यः । २ कामेनापि । ३ दाशार्हस्य कृष्णस्येत्यर्थः । ४ मन्दगतित्वनिर्बलत्वलक्षणं । ५ अन्तर्मध्ये भवो जन्मतो जन्मान्तरं तदेव वार्द्धिर्यस्य तत् ।

प्रमदापगायाम् ॥ १२॥ भवन्मतेन्दोर्मम हृच्चकोरे, शमामृतं साधुहितं पिपासौ । अदभ्रविश्रोतसिकाभ्ररेखा,
सैषान्तरुत्थाय करोति विघ्नम् ॥ १३॥ नीतं फलाशां मम चारुचेतः–क्षेत्रे त्वदाज्ञामृतसारणीभिः । कुतोप्युपेतो
बत बोधिबीजम्, प्रमादकोलः सकलं निहन्ति ॥ १४ ॥ याऽसूत्रि सूत्रेण तवैव पुण्य–शाला विशाला मम
चित्तभूमौ । तामद्य भिन्दन् क्रमबद्धमूलो, मोहप्ररोहः कथमेष रक्ष्यः ? ॥ १५ ॥ भवाटवीतः शिववासमाशु-
मुपक्रमन्तेऽत्र जना न के के ?। मिथ्यात्वरथ्यापरिवर्त्ततस्तु, ते दिग्विमूढा इव हि भ्रमन्ति ॥ १६ ॥ तुच्छेन्द्रि-
यार्थैः कुवलीफलाभैर्विलोभ्य मां बालमनङ्गधूर्त्तः । त्वदेव देवाधिगतं विवेक–रत्नं भृशं दुर्लभमाच्छिनत्ति
॥ १७ ॥ समं सुमास्त्रेण तवाऽवियोगा, कदा जगन्मित्र ! बभूव मैत्री । स्थितिर्मदन्तःकरणेऽल्पकेऽपि, तवापि
तस्यापि यदद्य जाता ॥ १८ ॥ युधि त्वया त्रासित एष कामो, मच्चित्तदुर्गं विवशो विवेश । तत्रापि वीरस्त्व-
मुपागतोऽसि, तद्दूरय क्रूरममुं निगृह्य ॥ १९ ॥ अपायतः पासि कथं त्रिलोक–मोकस्तवैवातिकृशं भृशं सः ।
मच्चेत एतत्त्वयि मध्यगेपि, यत्साम्प्रतं लुम्पति कामचौरः ॥ २० ॥ यद्वा स्वसद्मापि समत्वसार !, नाऽरिक्षितं
रक्षितुमुद्यमस्ते । अयं शमः कस्य न विस्मयाय, पुनः प्रभो ! न प्रभुधर्म एषः ॥ २१ ॥ सर्वस्वनाथ ! स्वयमेव
चेत–श्चेत्कृन्तसीदं मम तन्न खेदः । रागादिभिर्वैरिभिरर्द्यमान–मुपेक्षसे यत्तदलं दुनोति ॥ २२ ॥ येन त्वदाज्ञा

१ अदभ्रविश्रोतसिकाभ्ररेखा महदज्ञानतामेघपङ्क्तिः । २ प्रमाद एव कोलः सूकरः । ३ कुवलीफलाभैर्बदरीफलसदृशैः । ४ कामेन ।
५ कामस्यापि । ६ अरिक्षितं आन्तरशात्रवैर्विनष्टम् ।

बहुशो व्यलोपि, भ्रमेण सर्वत्र तया भियेव । स एष चेतश्चरटो नियंत्र्य युक्तं त्वयावासि निजाङ्घ्रिमूले ॥२३॥
शान्ताभिधं सिद्धरसं तवेश !, दृष्टावहं साधयितुं समीहे । पञ्चेन्द्रियव्यन्तरका अकाले, जिहीर्षवस्तं भवतैव
वार्याः ॥ २४ ॥ भवोदधौ तावकतत्त्वमुक्ता, व्यक्ता जिघृक्षामि [1]सुदुर्विधोऽहम् । [2]दुरायतिर्धावति किन्तु हन्तु-
मज्ञाननक्रः क्रियते किमीश ! ॥ २५ ॥ शमद्रुमो मे भवदुक्तवृत्त्या, प्रपालितः पुण्यफलान्यदास्यत् । न चोर्द्ध्व-
शोषं तमशोषयिष्य-न्निविश्य चेत्कोपकपोतपोतः ॥ २६ ॥ त्वदागमाम्भोदरसैरशेषां, तृष्णामहं चातकवच्छिछ-
नद्मि । यावद्भवौ तावदखर्वगर्व-पूर्वानिलो मत्प्रमदासहिष्णुः ॥ २७ ॥ संसारकुग्राममपास्य मुक्ति-पुर्यैं प्रतिष्ठेऽ
धिगतत्रिरत्नः । यदा तदाभिज्ञ ! भनक्ति मायो-रगी पुरोगा शकुनानुकूल्यम् ॥ २८ ॥ निघ्नन्मनो[3]रङ्कुमवा-
र्यवीर्य-स्तुष्टे त्वयि द्वीपितुलामवापम् । परं चरन्तं शिववर्त्मना मां, लोभानलो भापयति प्रदीप्तः ॥ २९ ॥
मां यानि यान्तं नरकादिघोर-स्थानेष्वपि प्रागनुजग्मुरीश ! । कर्म्माणि तानि त्वयि वीक्षितेऽपि, नोज्झन्ति
हेतुश्चिर[4]संस्तवोऽत्र ॥ ३० ॥ सम्भूय भावारिभिरेवमर्द्य-मानं स्वयं शाश्वतसौख्यलीनः । उपेक्षसे मां यदि
तद्वराकी, निराश्रया नाथ ! दया क्व यातु ? ॥३१॥ उत्सार्य मात्सर्यमदादिवैरि-व्रातं निरातङ्कतया कथञ्चित् ।
विश्वेश ! वि[5]श्वासुखपीडितोऽहं, प्राप्तोऽस्मि ते दृष्टिमतः प्रसीद ॥ ३२ ॥ श्रीमद्रैवतदैवत ! स्तुतिमिमां

---

१ अतिदरिद्रोऽहं । २ दुरायतिः असम्पत्तिदर्शको भविष्यत्कालो यस्य सः । ३ मन एव रङ्कुर्मृगस्तं । ४ चिरपरिचयः ।
५ संसारदुःखेन पीडितः ।

निर्माय नेमीश ! ते, सूरिः श्रीजयशेखरः स्थिरधिया यत्पुण्यमासादयत् । तेन स्तेनतुलान्तरारिनिवहाव्यालु-
सविद्याधनो, धेयात्त्वन्मतपूततत्त्वपद[1]वीनित्याध्वगानां धुरम् ॥ ३३ ॥

॥ इति श्रीजयशेखरसूरिकृता श्रीगिरनारगिरिमण्डनश्रीनेमिनाथस्तुतिगर्भिता द्वितीया द्वात्रिंशिका ॥

## ॥ अथ श्रीमहावीरजिनस्तुतिगर्भिता—द्वात्रिंशिका ॥

अकम्पसम्पल्लवं[2]लीवसन्तं, निरीहचित्ते विमले वसन्तम् । कामं निकामं विरसं हसन्तं, नुवामि वीरं मह-
सोल्लसन्तम् ॥ १ ॥ आमूलविच्छिन्नभवावगाह !, [3]संवित्तिवल्लीवरवारिवाह ! । जयामयातङ्ककलङ्कपङ्क—निरा-
सनीराऽसमवीर वीर ! ॥ २ ॥ अपारसंसारविहारखिन्न—च्छायातरुच्छायममोघसेवम् । सेवामहे सिद्धिसमाग-
माय, तवागमं जीवनिकायबंधो ! ॥ ३ ॥ महोदयं मोहं[4]तमीसमुत्थं, तमोभरं भूरितमं निहन्तुम् । निरन्तरायं
तरणिं भवन्तं, के केऽभिसन्धिं न धरन्ति नन्तुम् ॥ ४ ॥ महारसा देवगणात्तसेवा, तच्चित्तकामं परिपूरयन्ती ।
अङ्गावलिं चारुरुचिं वहन्ती, वाणी विभो ! कामगवी तवेह ॥ ५ ॥ अंहोनिरासं करुणानिवासं, ससंवरं सार-
रमाविलासम् । आयासदूरं महिमोरुपूरं, स[5]न्देहमन्देहसमूहसूरम् ॥ ६ ॥ [6]असंपरायं नवहेमकायं, विभिन्नभा-
वारिबलं विमायम् । महोमहोल्लासभवं भवन्तं, सन्तो नमन्तो मुदमावहन्ति ॥ ७ ॥ [ युग्मम् ] आ[7]भीलता-

---

१ त्वन्मतपवित्रतत्त्वमार्गे नित्यपथिकानां २ अकम्पसम्पदेव लवली वृक्षस्तस्य वसन्तर्त्तुतुल्यम् । ३ ज्ञानलताप्रधानमेघ ! । ४ अज्ञानरात्र्याः समुद्भवं । ५ सन्देहमूर्खसमूहपण्डितम् । ६ अपुनर्जन्मानं । ७ आभीलं दुःखं तच्चासौ ताल्रूर आवर्त्तस्तं धरतीति तस्मिन्.

लूरधरे दुरीहा–वेलाविलासे [1]जलमन्दिरे च । असारनारीजलचारिजीव–समाकुले रागतरङ्गसङ्गे ॥ ८ ॥ तारं गभीरे कलिकालचण्ड–समीरसंघट्टसमुद्धरे च । निस्सीमभीमे भवसागरेऽहं, तरीसमं ते चरणं वरामि ॥ ९ ॥ [ युग्मम् ] वाणीरसं सारतरं रसन्तो, हे वीर ! धाराधरबन्धुरं ते । संसारिसारङ्गविहङ्गपूगा, अखण्डमानन्द-भरं धरन्ति ॥ १० ॥ कल्लोललोला कमला [2]सुवामा, [3]वामावहा [4]वाँहचलं बलं च । चिन्तानिमित्तं परिवारमेलो, देहं दुरन्तामयगेहमेव ॥११॥ भुजङ्गभोगा नरदेवभोगा, भारो [5]भरेणाऽऽभरणावलीयम् । सारा परं ते चरणार-विन्द–सानन्दसेवा भुवि देवदेव ! ॥ १२ ॥ [ युग्मम् ] रे दम्भ ! संरम्भमिमं विमुञ्चा–खिलं बलं संहर सम्बँ-[6]रारे ! । हे मोह ! ते को महिमा समिद्धो, देवो ममायं किल वीरनामा ॥ १३ ॥ सलीलहासालयहावभाव–वि-लासहेलारसमंथरासु । अकुण्ठवाणीकलकण्ठकण्ठ-रोलम्बजायाजयलालसासु ॥ १४ ॥ अमन्दमन्दारमरन्द-बिन्दु–मत्तालिझङ्काररवाकुलासु । आपीडताडंकललाममञ्जु–मञ्जीरहारावलिभासुरासु ॥ १५ ॥ रम्भोरुदण्डासु सरोजनाल–सो[7]मालबाहाचलकङ्कणासु । बिम्बीफलाभाधरपल्लवासु, कपोलपालीकलकुण्डलासु ॥ १६ ॥ विभा-वरीवल्लभभित्तिभाल–विलोलकालच्छविकुन्तलासु । अभङ्गुराडम्बरपञ्चबाण–तूणीरधम्मिल्लमनोरमासु ॥१७॥ सम्पन्नराढाभरमारदारा–हङ्कारसंहारपरायणासु । आसीरहो सङ्गमदेवमाया–सिद्धासु रामासु विभो ! न

---

१ 'डलयोरैक्यं' भवपक्षे जडमन्दिरे मन्दमतिस्थाने सागरपक्षे तु स्पष्टमेव. २ सुसरस्वती. ३ वामाङ्गमावहतीति वामावहा । ४ वायुवच्चपलं. ५ उत्कर्षेण. ६ काम. ७ सोमालेति सुकुमालार्थवाचको देशीशब्दः

रागी [ कुलकम् ] ॥ १८ ॥ नरा महासाहसबद्धसन्धा, विधाय बाढं रणमन्तरङ्गम् । इमं च देवं सबलं सहायं, पराजयन्ते सहसाऽरिवृन्दम् ॥ १९ ॥ [1]विसारिवासे सुगुणे विपङ्के, पङ्केरुहाभे चरणे चिरं ते । वन्दारुदेवासुर-भूमिपाला, मरालमालाकरणीभवन्ति ॥ २० ॥ रङ्गत्तुरङ्गे करवालकुन्त–च्छुरीकराले बहलेभमाले । संनद्धवीरे बलिबद्धबाणा–सारेण [2]सारे समरे [3]समारे ॥ २१ ॥ [4]दावे च कीलाभय भीरुभूरि–कुरङ्गबाले बहुदत्तदाहे । धूमोदयच्छन्ननभोविभागे, संहारकालानलसंनिकासे ॥ २२ ॥ अवारपारे च सुदूरकूले, [5]कूजन्तुखेलाऽचलवारिपूरे । वेलाचलाच्छिन्नतरङ्गरङ्गे, निरन्तराले बहुसिन्धुसङ्गे ॥ २३ ॥ सफालसिंहोरगरोगनाग–कुकालवेतालदरे च गाढे । धीरा धरन्तो विभुवीरनाम, भवे न पीडाभिभवं लभन्ते ॥ २४ ॥ [ कलापकम् ] विहाय वीरं गिरिमेरुधीरं, न मे परे देवगणे समीहा । विना रसालं [6]गुरुसालसालं, नालं निकुञ्जम्पिकचित्तहारि ॥ २५ ॥ अश्नन्ति बुद्धा अमुमेव देवं, भावारिभीवारनिवारणाय । को नाम भूधामतमोविकार–धिक्कारकारी रविमन्तरेण ! ॥ २६ ॥ अहो न होमो न सुरापगा वा, [7]पञ्चानली दण्डकमण्डलू वा । अलं परं सिद्धिपुरं तु दातुं, नीरागवीरागमसङ्गमोऽयम् ॥ २७ ॥ हहा निरालम्बमपारमोह–जंबालजाले बहुले दयालो ! । इमं निजं किङ्करमेव देव !, मज्ज-

---

१ विसारिणो मत्स्यस्य वासो निवासो यत्र तस्मिन्. २ अतिदृढे. ३ मरणमारणाभ्यां सहिते. ४ अरण्ये. ५ कुवन्तेति कुवः 'कू' शब्दे इति तुदादिगणपठितधातोः क्विप् प्रत्ययः तथाच कुवः शब्दायमानाश्च ते जन्तवस्तेषां खेला क्रीडा तया अचलो निश्चलीभूतो वारिपूरो यस्मिन् तस्मिन्. ६ गुरुसालानां उत्तमवृक्षाणामेव सालो दुर्गो यस्मिन् तं. ७ पञ्चाग्निमान्.

न्तमुद्धेहि विलम्बसे किम् ? ॥ २८ ॥ हे [1]वीरकण्ठीरव ! मोहमत्त-करेणुमल्लं घनघोररावम् । उद्दामभुत्तुङ्गमुदारमङ्गि-भयावहं संहर मे सहेलम् ॥ २९ ॥ नीरोग ! नीरङ्ग ! निरन्तर[2]रङ्गा-रिभङ्ग ! निस्सङ्ग ! गुणालिचङ्ग ! । सदा सदाचारधुराधुरीण ! संवेगबुद्धिं मम देव ! देहि ॥ ३० ॥ कामो न कामे न चिरं रिरंसा, [3]महे महेलासु ममा-[4]वहेला । विहंगमोहं समयद्रुमे ते, भवामि मे केवलमेवमीहा ॥ ३१ ॥ इत्येवं समसंस्कृतस्तवमहं निर्माय निर्मायया, भक्त्या श्रीजयशेखरस्तव विभो ! यत्पुण्यमासाद्यम् । तेन त्वच्चरणारविंदयुगले लीनं मनो मामकं, भूयाज्जन्मनि जन्मनि भ्रमरवत्पात्रं प्रमोदश्रियः ॥ ३२ ॥

इति श्रीजयशेखरसूरिकृता महावीरजिनस्तुतिगर्भिता तृतीया द्वात्रिंशिका ।

---

१ वीरसिंह ! २ प्रीतिः. ३ उत्सवे. ४ अनादरः.

॥ तत्समाप्तौ समाप्तेयं द्वात्रिंशिकात्रयी ॥

॥ इति श्रीद्वात्रिंशिकात्रयी ॥